Same work as that described under No. 9467, but with the addition of two stanzas at the end as given below:—

श्रीमन्मेरौ कुलाद्रौ रजतगिरिवरे शाल्मलीवृक्ष(भागे)
वक्षारे चैत्यवृक्षे रतिकररुचके कुण्डले मानुषाङ्के ।
इष्टाकारेऽञ्जनाद्रौ दधिमुखशिखरे व्यन्तरे स्वर्गलोके
ज्योतिर्लोकेऽभि(वन्दे) भुवनमहितले यानि चैत्या(नि) तानि ॥

देवासुरेन्द्रनरनागसमार्चितेभ्यः पापप्रणाशकरभव्यमनोहरेभ्यः ।
घण्टाध्वजादिपरिवारविभूषितेभ्यः नित्यं नमो जगति सर्वजिनालयेभ्यः ॥

No. 11370. तीर्थंकरस्तोत्रम्.
TĪRTHAṄKARASTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 35*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

A eulogy on the twenty-four Tīrthaṅkaras of the Jainas.

Beginning:

अथ सर्वातिचारविशुद्ध्यर्थं चतुर्विंशतितीर्थंकरभक्तिकायोत्सर्गं करोम्यहम् । णमो अरिहत्ताणं

* * * *

ये लोकेऽष्टसहस्रलक्षणधरा ज्ञेयार्णवान्तर्गताः
ये सम्यग्भवजालहेतुमथनाश्चन्द्रार्कतेजादिकाः ।
ये साध्विन्द्रसुराप्सरोगणशतैर्गीतप्रणुत्यार्चिता-
स्तान् देवान् वृषभादिवीरचरमान् भक्त्या नमस्याम्यहम् ॥

End:

कुण्ठुं सिद्धालयस्थं श्रवणमतिमरं त्यक्तभोगेषुचक्रं
मल्लिं विख्यातपौत्रं खचरगणसुतं सुव्रतं सौख्यराशिम् ।
देवेन्द्राच्यं नमीन्द्रं हरिकुलतिलकं नेमिचन्द्रं भवान्तं
पार्श्वं नागेन्द्रवन्द्यं शरणमहमितो वर्धमानं च भक्त्या ॥

* * * *

चतुर्विंशतितीर्थंकरशान्तिभक्तिकायोत्सर्गं करोम्यहम् ॥

No 11371. तीर्थंकरस्तोत्रम्.
TĪRTHAṄKARASTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 62*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 9446, wherein this has been called Jinarājastōtram.

No. 11372. दृष्टाष्टकम्.
DṚṢṬĀṢṬAKAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 45*a* of the MS. described under No. 8836.

Complete.

Same work as that described under No. 9469, but the introductory stanzas found therein in the beginning are given at the end in this manuscript.

No. 11373. धर्मतीर्थपञ्चकम्.
DHARMATĪRTHAPAÑCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 72*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works

Complete.

Same work as that described under No. 9472.

No. 11374. नन्दीश्वरभक्तिः.
NANDĪŚVARABHAKTIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 66*a* of the MS. described under No 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 9473.

No. **11375.** नमिनाथपञ्चकम्.

NAMINĀTHAPANCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 74*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 9474.

No. **11376.** निर्वाणभक्तिः.

NIRVĀṆABHAKTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 50*b* of the MS. described under No. 8836 and not on fol. 50*a* as stated therein.

Complete.

Same work as that described under No. 9475.

No. **11377.** निर्वाणभक्तिः—कर्णाटकटीकासहिता.

NIRVĀṆABHAKTIḤ WITH KANARESE MEANING.

Pages, 8. Lines, 7 on a page.

Begins on fol. 108*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 9475, but without the last stanza.

No. **11378.** नेमिनाथपञ्चकम्.

NĒMINĀTHAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 74*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 9477.

No. 11379. पञ्चगुरुभक्तिः.

PAÑCAGURUBHAKTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 64*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 9478.

No. 11380. पद्मप्रभपञ्चकम्.

PADMAPRABHAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 69*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 9479.

No. 11381. पार्श्वनाथपञ्चकम्.

PĀRŚVANĀTHAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 74*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 9480.

No. **11382.** भूपालस्तोत्रम्.
BHŪPĀLASTŌTRAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 43*b* of the MS. described under No. 8836, wherein this work has been mentioned as Jinastōtra in the list of other works.

Complete.

Same work as that described under No. 9486.

No. **11383.** मल्लिनाथपञ्चकम्.
MALLINĀTHAPAÑCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 73*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9488.

No. **11384.** मुनिसुव्रतपञ्चकम्.
MUNISUVRATAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 73*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9489.

No. **11385.** योगभक्तिः.
YŌGABHAKTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 53*a* of the MS. described under No. 8836.

Complete.

Similar to the work described under No. 9490.

Beginning:

दोस्सामि गुणपुराणे गुणाहितं चेहिं ।
अञ्जलिमौलिअहद्धा आहेवण्डतो सवि ह्वेण ॥

End:

एवं मए अहिन्दुदा अणआराराअदोपपरिसद्धदा ।
संगस्सवरसमहिमं एदुवरवक्खवइआन्दिचुं ॥

No. 11386. योगभक्तिः—कर्णाटकटीकासहिता.

YŌGABHAKTIḤ WITH KANARESE MEANING.

Pages, 13. Lines, 7 on a page.

Begins on fol. 89*b* of the MS. described under No. 8836.

Complete.

Same work as that described under No. 9490, but with Kanarese meaning.

No. 11387. योगीश्वरस्तुतिः.

YŌGĪŚVARASTUTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 53*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

A eulogy on Jaina ascetics.

Beginning:

जातिजरोरुगमरणातुरशोकसहस्रदीपिता दुस्सहनरकपथनासन्त्रस्तधिय प्रतिबद्धचेतसः जीवितमम्बुबिन्दुचपलं तटिदभ्रसमा विभूतयः सकलमिदं विचिन्त्य मुनयः प्रशमाय वनान्तमाश्रिताः ।

End:

योगीश्वरान् जिनान् सर्वान् योगनिर्धूतकल्मषान् ।
योगैस्त्रिभिरहं वन्दे योगस्कन्धप्रातिष्ठितान् ॥

प्रावृट्काले सविद्युत्प्रपतितसलिले वृक्षमूलेऽधिवासं
सेवन्ते रात्रिमध्ये प्रतिविगतभयाः काष्ठवत्त्यक्तदेहाः ।
ग्रीष्मे सूर्यांशुतप्ता गिरिशिखरगतस्थानकूटान्तरस्था-
स्ते(मे)धर्म(र्मं)प्रप(द)द्युर्मुनिगणवृषभा मोक्षनिःश्रेणिभूताः ॥

* * * *

गमणं समाहिमरणं जिणगुणसंपत्तिहोम्मज्झम् ॥

No. 11388. वर्धमानचन्द्रस्तोत्रम् — कर्णाटकटीकासहितम्.
VARDHAMĀNACANDRASTŌTRAM WITH KANARESE MEANING.

Pages, 8. Lines, 7 on a page.

Begins on fol. 104*b* of the MS. described under No. 8836, wherein this work has been mentioned as Nirvāṇabhakti in the list of other works.

Complete.

Same work as that described under No. 9491, but with Kanarese commentary and with the addition of one stanza in the beginning as given below :—

हस्तीन्द्रं वृषभं हरिं सरसिजं मौलौ सुधांशुं रविं

* * * *

स्वप्नेऽपश्यदसौ जिनो भवतु मे दुःस्वप्नविच्छित्तये ॥

No. 11389. वर्धमानचन्द्रस्तोत्रम्.
VARDHAMĀNACANDRASTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 50*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 9491.

No. 11390. वर्धमानस्तोत्रम्.
VARDHAMĀNASTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 75*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9493.

No. 11391. वासुपूज्यपञ्चकम्.
VĀSUPŪJYAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 71*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9495.

No. 11392. विमलपञ्चकम्.
VIMALAPAÑCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 71*b* of the MS. described under No 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9496.

No. 11393. विषापहारस्तोत्रम्.
VIṢĀPAHĀRASTŌTRAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 82*b* of the MS. described under No. 8836.

Complete.

Same work as that described under No. 9497.

No. 11394. वीरस्तोत्रम्.
VĪRASTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 84*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9499.

No. 11395. वृषभपञ्चकम्.
VṚṢABHAPAÑCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 68*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9501.

No. 11396. शम्भवपञ्चकम्.
ŚAMBHAVAPAÑCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 69*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9503.

No. 11397. शान्तिनाथपञ्चकम्.
ŚĀNTINĀTHAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 72*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works given therein.

Complete.

Same work as that described under No. 9504.

No. 11398. शान्त्यष्टकम्.
ŚĀNTYAṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 64*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9507, but with the addition of a few stanzas at the end as given below :—

क्षेमं सर्वप्रजानां प्रभवतु बलवान् धार्मिको भूमिपालः
काले काले च सम्यग्वर्षतु मघवान्व्याधयो यान्तु नाशम् ।
दुर्भिक्षं चोरमारि क्षणमपि जगतां मा स्म भूज्जीवलोके
जैनेन्द्रं धर्मचक्रं प्रभवतु सततं सर्वसौख्यप्रदायि ॥

* * * *

गमणं समाहि (. . . . . .) होम्मज्झम् ॥

No. 11399. शान्त्यष्टकम्.
ŚĀNTYAṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 47*b* of the MS. described under No. 8836.

Complete.

Same work as that described under No. 9505.

No. 11400. शीतलपञ्चकम्.
ŚĪTALAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 70*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9508.

No. 11401. श्रुतभक्तिः.
ŚRUTABHAKTIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 57*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 9510.

No. 11402. श्रुतस्तोत्रम्.
ŚRUTASTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 59*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Similar to the above.

Beginning :

अर्हद्वक्त्रप्रसूतं गणधररचितं द्वादशाङ्गं विशालं
चित्रं बह्वर्थयुक्तं मुनिगणवृषभैर्धारितं बुद्धिमद्भिः ।
मोक्षाग्रद्वारभूतं व्रतचरणफलं ज्ञेयभावप्रदीपं
भक्त्या नित्यं प्रवन्दे श्रुतमहमखिलं सर्वलोकैकसारम् ॥

End :

कोटीशतं द्वादश चैव कोट्यो लक्षाण्यशीतिस्त्र्यधिकानि चैव ।
पञ्चाशदष्टौ च सहस्रसंख्यामेतच्छ्रुतं पञ्चपदं नमामि ॥

* * * *

गमणं समाहिमरणं जिणगुणसंपत्तिहोम्मज्झम् ।

No. 11403. श्रेयःपञ्चकम्.
ŚRĒYAḤPAÑCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 71*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9511.

No. 11404. सिद्धभक्तिः
SIDDHABHAKTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 29*a* of the MS. described under No. 8836 wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 9515, but without colophon.

No. 11405. सिद्धभक्तिः.
SIDDHABHAKTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 56*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 9514.

No. 11406. सिद्धभक्तिः—कर्णाटकटीकासहिता.
SIDDHABHAKTIḤ WITH KANARESE MEANING.

ages, 7. Lines, 7 on a page.

Begins on fol. 115*b* of the MS. described under No. 8836.

Complete.

Same work as that described under No. 9514, but with Kanarese meaning.

No. 11407. सिद्धभक्तिकायोत्सर्गः—कर्णाटकटीकासहितः.
SIDDHABHAKTIKĀYŌTSARGAḤ WTIH KANARESE MEANING.

Pages, 7. Lines, 8 on a page.

Begins on fol. 112*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 9516, but with Kanarese meaning and without the first two lines in the beginning.

No. 11408. सिद्धस्तोत्रम्—कर्णाटकटीकासहितम्.
SIDDHASTŌTRAM WITH KANARESE MEANING.

Pages, 3. Lines, 7 on a page.

Begins on fol. 111*b* of the MS. described under No. 8836, wherein this work has been mentioned as Mahāvīrastuti in the list of other works

Complete.

A eulogy on the Jaina Siddhas.

Beginning:

सिद्धं संपूर्णभव्यार्थं सिद्धिकारणमुत्तमम् ।
प्रसन्नदर्शनज्ञानचारित्रप्रतिपादिनम् ॥

* * * *

संसारचक्रगमनागमनप्रमुक्तान् जात्या जरामरणबन्धनतापमुक्तान् ।
देवेन्द्रदानवगणैरभिपूज्यमानान् सिद्धांस्त्रिलोकमहितान् शरणं प्रपद्ये ॥

End:

सिद्धेभ्यो निष्ठितार्थेभ्यो वरिष्ठेभ्यः कृतादरात् ।
अभिप्रेतार्थसिद्ध्यर्थं नमस्कुर्वे पुनः पुनः ॥

णमो अर्हत्ताणं णमो सिद्धाणं णमो आआरिआणं

* * * *

लोए सव्वसाहूणं ॥

No. 11409. सिद्धस्तोत्रम्.
SIDDHASTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 54*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Similar to the above, but without Kanarese meaning.

Beginning:

नमोऽस्तु धूतपापेभ्यः सिद्धेभ्य ऋषिपर्षदे ।
सामायिकं प्रपद्येऽहं भवभ्रमणसूदनम् ॥

End:

संसारचक्रगमनागमनप्रवृत्तान् जात्या जरामरणबन्धनतो विमुक्तान् ।
देवेन्द्रदानवगणैरभिपूज्यमानान् सिद्धांस्त्रिलोकमहितान् शरणं प्रपद्ये॥

* * * *

णमो अर्हत्ताणं इत्यादि ॥

No. 11410. सुपार्श्वपञ्चकम्.
SUPĀRŚVAPAÑCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 70*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9517.

No. 11411. सुमतिपञ्चकम्.
SUMATIPAÑCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 69*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9518.

No. 11412. सुविधिपञ्चकम्.

SUVIDHIPAÑCAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 70*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works given therein.

Complete.

Same work as that described under No. 9519.

No. 11413. स्वप्नस्तवः—कर्णाटकटीकासहितः.

SVAPNASTAVAḤ WITH KANARESE MEANING.

Pages, 8. Lines, 7 on a page.

Begins on fol. 101*a* of the MS. described under No. 8836, wherein this work has been mentioned as Svapnāvali in the list of other works.

Complete.

Same work as that described under No. 9520 but with Kanarese meaning and without the first stanza

---

No. 11414. स्वप्नस्तवः.

SVAPNASTAVAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 49*a* of the MS. described under No. 8836, wherein this work has been mentioned as Svapnāvali in the list of other works.

Complete.

Same work as that described under No. 9520, but with the addition of the following stanza at the end, which is given in the beginning under No. 9430 :—

हस्तीन्द्रं (. . . . .) विच्छित्तये ॥

(*f*) NADĪ.

No. 11415. कृष्णाष्टकम्.
KṚṢṆĀṢṬAKAM.

Pages, 2. Lines, 4 on a page.

Begins on fol. 14*b* of the MS. described under No. 2848.

Complete.

Eight stanzas in praise of the river Kṛṣṇā, the repetition of which is held to enable one to remove one's sins.

Beginning:

शङ्खचक्रधरां देवीं नीलोत्पलदलप्रभाम् ।
विष्णुरूपाङ्कितां पुण्यां कृष्णवेणीं नमाम्यहम् ॥
शुद्धस्फटिकसंकाशां द्विभुजां पद्मधारिणीम् ।
शिवमूर्तिधरां देवीं कृष्ण—— ॥

End:

स्वर्गारोहणसोपानं महापुण्यतरङ्गिणीम् ।
फलदां सर्वतीर्थानां कृष्ण. . ॥
कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
कोटिजन्मकृतं पापं स्मरणेन विनश्यति ॥

(*g*) NAVAGRAHA.

No. 11416. नवग्रहमङ्गलस्तोत्रम्.
NAVAGRAHAMAṄGALASTŌTRAM.

Pages, 5. Lines, 4 on a page.

Begins on fol. 128*b* of the MS. described under No. 2421, wherein this work has been omitted to be included in the list of other works.

Complete.

Stanzas addressed to the nine planets invoking them to confer blessings on a person.

Beginning:

आदित्यः सविता सहस्रकिरणः सूर्योऽशुमाली पतिः
मार्ताण्डः कुमुदाप्रि(भ्य)मित्र(उ)दयाद्रीशो जगत्साक्षिणः ।
नाथः सर्वजगत्पातिश्च जगदाधारत्रयीरूपग
श्रीसूर्यात्मसुलग्नविश्वफलदं कुर्वन्तु ते मङ्गलम् ॥ १ ॥
श्वेताङ्गः कुमुदाप्तशीतकिरणः क्षीराम्बुनिर्जातकः
लक्ष्मीसोदरकृष्णलाञ्छनदशाश्वारूढ अत्रेयजः ।
शम्भु(म्भो)र्मण्डनभूषणौषधपतिः पूर्णाङ्गपूर्णोदय-
श्चन्द्रैकादशवर्गलग्नफलदं कुर्वन्तु ते मङ्गलम् ॥ २ ॥

End:

श्रीमज्जैमिनिगोत्रसंभवमहापूर्णाङ्गमेघद्युतिः
गृध्रारूढमहाललाटधनवान् श्रीपुण्यमूर्तिर्विदु(धु)ः ।
अष्टाशीतिसहस्रयोजनमहाविस्तीर्णदेहो(हः)सुखी
केत्वेकादशवर्गलग्नफलदं कुर्वन्तु ते मङ्गलम् ॥९ ॥

(*h*) PARABRAHMAN.

No. **11417.** ब्रह्मपञ्चकम्.
BRAHMAPAÑCAKAM.

Pages, 2. Lines, 16 on a page.

Begins on fol. 190*b* of the MS. described under No. 424, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Five stanzas on the identity of the individual soul with the Supreme Brahman.

Beginning:

आब्रह्मविष्णुमशिवेषु चराचरेषु
यत्प्राप्य चेतयति पश्यति वै शृणोति ।

आस्वादयत्यपि च सर्वमखर्वसुद्ध्या (बुद्ध्या)
ब्रह्मैव तत्त्वमसि वत्स न संशयो नः ॥

End:

रज्जौ फणीव जलवन्मृगतृष्णिकायामाकाशतामरसकल्पम(न)ल्पशिल्पम् ।
आभाति यत्र महदादि जगद्विचित्रं ब्रह्मैव तत्त्वमसि वत्स न संशयो नः ॥

(*i*) PĀRVATĪ.

No. 11418. कामाक्षीस्तोत्रम्.
KĀMĀKṢĪSTŌTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 35*a* of the MS. described under No. 514.

Contains twenty-nine stanzas.

Stanzas of praise addressed to the goddess Kāmākṣī and praying for her grace.

Beginning:

कामाक्षि ते पदयुगं भजतां नराणां लक्ष्मीरनन्यसुलभेभरथाश्वयुक्ता ।
यातुं तथाविधविभूमविगाहमाना कामाक्षि देवि मम देहि कृपाकटाक्षम् ॥

End:

केचिद्विदुर्हि भवतीं भवपूर्वभद्रकालीमुमामपि च दक्षसुतामिति त्वाम् ।
सा सर्वविश्वमयरूपिणि भद्रदे त्वं कामाक्षि (. . . . . . .) क्षम ॥

No. 11419. पार्वतीस्तोत्रम्.
PĀRVATĪSTŌTRAM.

Pages, 2. Lines, 13 on a page.

Begins on fol. 2*a* of the MS. described under No. 10574, wherein this work has been mentioned as Pārvatīkhaḍgamālā 13*a* in the list of other works.

Complete.

Stanzas of praise in the Aśvadhāṭī metre addressed to the goddess Pārvatī.

Beginning :

चेटीभवन्निखिलखाटीकदम्बवनवाटीषु नाकिपटली-
कोटीरचारुतरकोटीमणीकिरणकोटीकरम्बितपदा ।
पाटीरगन्धकुचशाटी कवित्वपरिपाटीन(म)गाधिपसुता
घोटीकुलादधिकधाटीमुदारमुखवीटीरसेन तनुताम् ॥ १ ॥

End :

संतापजालमयहिन्तालघोरमरुदन्तानियोगरहितो
रन्ता कदम्बभुवि दन्तावलो गतिषु चिन्तामणिर्वितरणे ।
हन्ता तमोऽलिरुचिदन्तानिलघ्नबिसवन्तावुरोजभरतो
नन्ता मतङ्गमुनिसंतानभावभृशमन्ता पुनातु महिमा ॥

(*j*) BASAVA.

No. 11420. बसवगद्यम्.

BASAVAGADYAM.

Pages, 12. Lines, 6 on a page.

Begins on fol. 39*a* of the MS. described under No. 2418, wherein it is mentioned as Pañcaprakāśagadya in the list of other works.

Complete

Same work as that described under No. 9544, but with the addition of one stanza at the end as given below :—

बसवस्य कृपामूर्तेः सोमनाथप्रसादिना[म्] ।
अनवद्यमिदं गद्यं हतिचोद्यं च जिह्वतम्(?) ॥
जय बसव दण्डनायक नमस्ते नमस्ते नमः ॥

No. 11421. बसवोदाहरणस्तोत्रम्.

BASAVŌDĀHARAṆASTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 10955, wherein this work has been mentioned as Udāharaṇagadya in the list of other works.

Incomplete.

Same work as that described under No. 9564.

(k) RĀMĀNUJA.

No. 11422. यतिराजसप्ततिः—सव्याख्या.
YATIRĀJASAPTATIḤ WITH COMMENTARY.

Pages, 42. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 10008.

Complete.

The text here is the same as the work described under **No.** 9678 and it is followed by a commentary.

Beginning:

श्रीमान् वेङ्कटनाथार्यः (. . . . .) सदा हृदि ॥
कमप्याद्यं गुरुं वन्दे (. . . . .) पञ्चरात्रस्य यः स्वयम् ॥

श्रीमान् वेङ्कटनाथार्यः स्वप्रबन्धादौ प्रबन्धपरिसमाप्त्यर्थं गुरुपरंपरां प्रणमति । कमलायाः लक्ष्म्याः गृहैः दारैः मेध्यते गच्छतीति गृहमेधी गृहस्थ इत्यर्थः तं तथोक्तं कमपि आद्यं गुरुं वन्दे नमामि । यो गुरुः छन्दसां वक्ता वेदानां प्रवक्ता; कर्माणि षष्ठी । स्वयं पञ्चरात्रस्याम्नायस्य वक्ता व्याख्याता ।

End:

करतलामलकीकृत (. . . . . .) सप्ततिसादराः ॥
करतलेति । करतले आमलकीकृतः सत्पथः सन्मार्गः यैस्ते ।

* * * *

दिवसतारकयन्ति दिवसनक्षत्राणि कुर्वन्ति । यतिराजसप्ततिसादराः । समत्सराः वादिनः दिवसतारका इव न स्फुरन्तीत्यर्थः ॥

Colophon:

यतिराजसप्ततिव्याख्यानं संपूर्णम् ।

No. **11423.** यतिराजसप्ततिः—सव्याख्या.
YATIRĀJASAPTATIḤ WITH COMMENTARY.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 60. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 12*a*. The other works herein are Vivādārthasaṅgraha 1*a*, Gītārthasaṅgraharakṣā 42*a*.

Complete.

Same text as in the above, but together with the commentary described under R.No. 595 of the Triennial Catalogue of MSS., Vol. I, Part I–C.

(*l*) LAKṢMĪ.

No. **11424.** पेरुन्देवीस्तोत्रम्.
PERUNDĒVĪSTŌTRAM.

Substance, paper. Size, $8\frac{3}{4} \times 5\frac{3}{8}$ inches. Pages, 19. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 30*a*. The other works herein are Ḍamaruka 1*a*, Mahiṣaśataka 39*b*.

Incomplete.

This is a hymn in praise of the goddess Perundēvī, the consort of God Varadarāja worshipped in the sacred shrine at Conjeeveram. In the heading of the MS. the name of this work is given as Bhallaṭaśataka.

Beginning:

वन्दे पदारविन्दं दुग्धपयोराशिदुहितुरप्रतिमम् ।
यद्वन्दनादमन्दं भद्रं प्राप्नोति पामरोऽपि जनः ॥ १ ॥
यन्नाम कीर्त्यमादौ श्रीरिति दिव्या हरेर्नाम्नाम् ।
सा मे समस्तजननी सन्ततमुदयाय भूयसे भूयात् ॥ २ ॥

मातः समस्तजगतां हेतुः संचिन्तितार्थसिद्धीनाम् ।
पातु प्रभातपद्मप्रतिभटमङ्घ्रिद्वयं त्वदीयं माम् ॥ ३ ॥
श्रीवरदेश्वरदयिते वाञ्छामि त्वां यथामति स्तोतुम् ।
डिम्भस्य जल्पितं तत् कियदपि मातुर्न किं भवेत्प्रीत्यै ॥ ४ ॥
वाचामपि श्रुतीनामादिकवीनामगोचरे देवि ।
त्वद्वन्दने ममैषा वाञ्छा सफलास्तु करुणयैव तव ॥ ५ ॥
करिगिरिनायककान्ते दान्तजनस्वान्तपङ्कजनिशान्ते ।
मयि भवमरणाश्रान्ते करुणां शरणागते (कुरु) प्रगुणाम् ॥ ६ ॥

End:

आभाति देवि नाभी शम्बररिपुणेव शबरवीरेण ।
लोचनहरिणं शौरेर्गर्त इव निपाति(खानि)तो निपातयितुम् ॥ ९२ ॥
शङ्के तवाम्ब नाभिं शंकररिपुणा विजित्य दैत्यारिम् ।
रोमा[व]लिनीलरत्नस्तम्भनिघात . . . . . ॥ ९३ ॥

No. 11425. पेरुन्देवीस्तोत्रम्.
PERUNDĒVĪSTŌTRAM.

Pages, 2. Lines, 13 on a page.

Begins on fol. 2*b* of the MS. described under No. 10574 and not on fol. 3*b* as stated therein.

Wants beginning and breaks off in the twenty-fourth stanza. Same work as the above.

No. 11426. लक्ष्मीसहस्रम्.
LAKṢMĪSAHASRAM.

Pages, 2. Lines, 13 on a page.

Begins on fol. 4*a* of the MS. described under No. 10574.

Contains the first Stabaka incomplete.

Same work as that described under R.No. 733 of the Triennial Catalogue of MSS., Vol. I, Part I–C.

No. 11427. श्रीस्तुतिः—सव्याख्या.
ŚRĪSTUTIḤ WITH COMMENTARY.

Pages, 4. Lines, 6 on a page.

Begins on fol. 65*a* of the MS. described under No. 11336.

Contains the last stanza only, the commentary thereon being almost complete.

Same work as that described under R.No 160(*e*) of the Triennial Catalogue of MSS., Vol. I, Part I–A, but together with a commentary, the author of which is not known.

Beginning:

कल्याणानामविकलनिधिः कापि कारुण्यसीमा
नित्यामोदा निगमवचसां मौलिमन्दारमाला ।
संपद्दिव्या मधुविजयिनः संनिधत्तां सदा मे
सैषा देवी सकलभुवनप्रार्थनाकामधेनुः ॥

अस्यार्थः । अत्र देवी ते संनिधत्तामित्यनेन देवीसांनिध्यं यजमानस्य प्राथ्र्यते । ननु देवीसांनिध्यप्रार्थनेन किं प्रयोजनम्? तस्यापुरुषार्थत्वात् । लोके (सुखं दुःखा)भावश्च प्रयोजनम् । देवीसांनिध्यं न सुखं न वा दुःखाभावः । अतस्तस्य प्रयोजनत्वाभावान्न प्रार्थनासंभवः इतीमां शङ्कां निराकर्तुमाह—(कल्याणानामविकल)निधिरिति । कल्याणानां शुभानां पूर्णनिधिरित्यर्थः ।

End:

दानशीले च सदैव निवसाम्यहमिति देव्यैव स्वसांनिध्यनियामकत्वेन प्रतिपादितस्य नित्यत्वादिगुणविशिष्टस्य तव सदा सर्वस्मिन् काले संनिधत्तां सांनि.

(*m*) VIṢṆU.

No. 11428. अष्टपुष्पविवरणम्.
AṢṬAPUṢPAVIVARAṆAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 92*a* of the MS. described under No 5953.

Complete.

An enumeration of the eight kinds of flowers which are said to be acceptable to Viṣṇu. These are stated to be—refraining from injury to beings, restraint of senses, compassion, forgiveness, wisdom, penance, meditation and truthfulness (?).

Beginning and End:

अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः ।
सर्वभूतदया पुष्पं क्षमा पुष्पं विशेषतः ॥
ज्ञानं पुष्पं तपः पुष्पं ध्यानपुष्पं तथैव च ।
सदा(व्य?)मष्टविधं पुष्पं विष्णोः प्रीतिकरं भवेत् ॥

प्रातर्निद्राभिरामं स्मरणमव(थ)हरेस्स्नानसन्ध्या प्रवाले(भाते)
जापो होमश्च दानं प्रमुदितमनसा वेदशास्त्राति(दि)पा(ठः) ।
भुक्तिर्नैवेद्यशेषैरतिथिसहकृतैस्सत्पुराणावलोकैः
रात्रौ ध्यानश्च विष्णोरति(मित)सुकृतिना(म)न्वह(हं स्यात्)त्रिकालम् ॥

No. **11429.** दत्तात्रेयभुजङ्गस्तोत्रम्.

DATTĀTRĒYABHUJAṄGASTŌTRAM.

Pages, 8. Lines, 7 on a page.

Begins on fol. 34*b* of the MS. described under No. 200.

A eulogy in the Bhujaṅgaprayāta metre on Dattātrēya, who is held to be an incarnation of God Viṣṇu : by Śaṅkarācārya.

Beginning:

तटित्पुञ्जतुल्यैर्जटामण्डलैः स्वैर्विशिष्टं शुचिस्मेरपद्मासनस्थम् ।
सुनासापुटं सुन्दरभ्रूललाटं लसत्कुण्डलालोलगण्डस्थलान्तम् ॥

End:

सदा दत्तयोगीन्द्रविष्णोर्भुजङ्गं पठन् सन्ततं चिन्तयन् स्वान्तरङ्गे ।
स मोहं विहायात्मसौख्याम्बुराशिं भव(ज)त्येव नित्यं महायोगिवेद्यम् ॥

Colophon:

इति शङ्कराचार्यविरचितं दत्तात्रेयविष्णुभुजङ्गस्तोत्रं सम्पूर्णम् ॥

No. 11430. नरसिंहपञ्चामृतस्तोत्रम्.

NARASIMHAPAÑCĀMṚTASTŌTRAM.

Substance, Śrītāla. Size, 7⅛ × 2 inches. Page, 1. Lines, 14 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*b*. The other works herein are Vidhavākēśadhāraṇaniṣēdhavacana 1*a*, Ārādhanakārikā with commentary 2*a*, Nityagrantha 3*b*, Ārādhanaprayōga 4*b*, Ārādhanasaṅgraha 15*a*, Vaṅgīśakārikā 19*a*, Āpaduddhāraṇamantra 22*a*, Bhagavadārādhanaparyōga 23*a*.

Complete.

Five nectar-like stanzas in praise of Narasiṁha, the man-lion incarnation of Viṣṇu.

Beginning:

ज्ञानानन्दमयं देवं (. . . . .) हयग्रीवमुपास्महे ॥
गोविन्द केशव जनार्दन वासुदेव विश्वेश विश्व मधुसूदन विश्वरूप ।
श्रीपद्मनाभ पुरुषोत्तम पुष्कराक्ष नारायणाच्युत नृसिंह नमो नमस्ते ॥

End:

स्रष्टा च नित्यं जगतामशेषत्राता च हन्ता विभुरप्रमेयः ।
एकस्त्वमेव त्रिविधा विभिन्नस्त्वां सिंहमूर्ते शरणं नतोऽस्मि ॥
राघवेण कृतं स्तोत्रं पञ्चामृतमनुत्तमम् ।
यः पठेत्सततं भक्त्या नरसिंहपदं भजे(त्) ॥

No. 11431. यदुगिरीशस्तोत्रम्.

YADUGIRĪŚASTŌTRAM.

Pages, 9. Lines, 8 on a page.

Begins on fol. 56*a* of the MS. described under No. 5245.

Complete.

A eulogy on God Tirunārāyaṇa worshipped in the temple at Yadugiri (Melkota). The author's teacher seems to be Nagārya (Tirumalārya).

Beginning:

शुभयदुगिरिधामा कोऽपि कारुण्यसीमा
पदनतजनकामापादकश्यामधामा ।
श्रुतिशत(नु)तभूमा मङ्गलं पूतनामा
मम कलयतु भूमा लालिताङ्घ्रिस्तवामा(त्मा)॥
तर्के नैव परिश्रमो मम तथा तन्त्रेऽमला धीर्म(र्न)मे
वैद्यव्याकृतिधीकथापि न च मे काव्येऽमला वा मतिः ।
अप्येवं प्रयते यशः कवयितुं यद्वद्रिचूडामणे-
स्तत्कारुण्यतरङ्गिणी स(स्व)यमसौ कूलं नयेन्मामिह ॥

End:

ये मानवा यदुगिरीशनुतिं प्रभाते
भक्त्या पठन्ति(च) परार्थितकामधेनुम् ।
तेषां ददाति भगवानिह चापरत्र
सौख्यं दयाजलनिधिर्यदुशैलनाथः ॥
संसारदुर्मेघगतिप्रतप्तलेखापनायैव कृतावतारः ।
श्रीमानसौ भाति दयामृताब्धिः श्रीमन्नगार्यो गुरुसार्वभौमः ॥

No. **11432.** श्रीनिवासचूर्णिका.

ŚRĪNIVĀSACŪRṆIKĀ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 2*a* of the MS. described under No. 10836.

Complete.

A short prose composition, comprising several significant epithets, in praise of God Śrīnivāsa of Tirupati.

Beginning:

श्रीमद्राजाधिराजराजचन्द्रोदयराजमार्ताण्डराजतेजोनिधिराजकन्दर्प-

* * * *

शङ्खचक्रगदाधर शरणागतवज्रपञ्जर वेदवेदान्तवेद्य शास्त्रसंपन्न पुराणपुरुषो-त्तम ।

End:

श्रीदशावतारलीलाविनोद वेदगिरिनिलय श्रीअलमेल्मङ्गामनोहर पाहि मां परब्रह्मस्वरूप प्र(प्रा)णाधिप नमस्ते नमस्ते नमः ॥

(*n*) VĒDĀNTADĒŚIKA.

No. **11433.** आचार्यविंशतिः.

ĀCĀRYAVIṀŚATIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol 11*a* of the MS. described under No. 11336.

Complete.

Twenty stanzas in praise of Vēdāntadēśika: by Śrīnivāsa-rāghava, a disciple of Vēṅkaṭaguru.

Beginning:

श्रीरङ्गदिव्यनगरीन्दुमहीन्द्रभोगशय्याशयानमभिसन्तमनन्तपीठे ।
सह्याद्रिजान्तरतटालयमार्तबन्धुं श्रीरङ्गनायकमहं शरणं प्रपद्ये ॥

श्रीमद्वेङ्कटनामकं मम गुरुं श्रीवासयोगीश्वरं
श्रीरङ्गाधिपयोगिवर्यमतुलं मावासयत्यग्रगम् ।
वेदान्तार्यगुरुं च लक्ष्मणमुनिश्रेष्ठं शठद्वेषिणं
सेनेशं च रमां श्रियःपतिमहं मूर्ध्ना नमाम्यन्वहम् ॥

श्रीकाकोदरसार्वभौमशिखरिप्रान्तस्थतेजोमय-
श्रीवासाह्वयलोकनायकमहद्रत्नात्मघण्टात्मकम् ।
श्रीरङ्गाधिपतिप्रलब्धमहितश्रुत्यश्वलाचार्यकं
काञ्चीपत्तनशुक्तिमौक्तिकमहं वेदान्तसूरिं भजे ॥

End:

श्रीवात्सराघवबुधेन विनिर्मितेयं वेदान्तसूरिगुणरत्नविभूषिता च ।
आचार्यविंशतिरलं सुहृदां मुदे स्याद्वेदान्तदेशिककृपा च मयि प्रसन्ना ॥

Colophon:

आचार्यविंशतिः संपूर्णा ॥

No. **11434.** वेदान्तदेशिकगद्यम्.
VĒDĀNTADEŚIKAGADYAM.

Pages, 3. Lines, 9 on a page.

Begins on fol. 13*a* of the MS. described under No. 9729.

Complete.

Slightly different from that described under R.No. 673(*p*) of the Triennial Catalogue of Sanskrit MSS., Vol. I, Part I-C.

Beginning:

जयत्यखिलदुर्वादितिमिरौघादिवाकरः ॥
श्य (श्रु)तितापप्रशमने त्रय्यन्तार्यसुधाकरः ॥

जय जय महादेशिक निगमान्तदेशिक विश्वालङ्कारविश्वामित्र(कुल)-कलशोदधिकौस्तुभ ।

End:

श्रीरङ्गनाथपदकमलनिरन्तरानुभवनिरतिशयानन्दपरिपूर्णमनोरथ वि-शुद्धविद्याविभूषण विबुधजननाथ वेङ्कटनाथ मम नाथ नमस्ते नमस्ते नमः ॥

कवितार्किकसिंहाय (. . . .) वेदान्तगुरवे नमः ॥

No. **11435.** वेदान्तदेशिकमङ्गलाशासनम्.
VĒDĀNTADEŚIKAMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 22*b* of the MS. described under No. 9729.

Complete.

Slightly different from that described under R. No. 660(*a*) of the Triennial Catalogue of Sanskrit MSS., Vol. I, Part I–C, both in the beginning and in the end.

Beginning :

वादिद्विपशिरोभङ्गपञ्चाननपराक्रमः ।
श्रीमान् वेङ्कटनाथार्यो वेदान्तगुरुरेधताम् ।
श्रीमान् (. . . . . . .) सदा हृदि ॥

End :

सशङ्खचक्रलाञ्छनः सदूर्ध्वपुण्ड्रमण्डितः
सकण्ठलग्नसत्तुलस्यनर्घपद्ममालिकः ।
सितान्तरीयसोत्तरीययज्ञसूत्रशोभितो
ममाविरस्तु मानसे गुरुस्स वेङ्कटेश्वरः ॥
वादिद्विपशिरोभङ्गपञ्चाननपराक्रमः ।
श्रीमान् वेङ्कटनाथार्यो वेदान्तगुरुरेधताम् ॥

No. 11436. वेदान्तदेशिकवैभवप्रकाशिका.

VĒDĀNTADĒŚIKAVAIBHAVAPRAKĀŚIKĀ.

Pages, 18. Lines, 7 on a page.

Begins on fol. 48*a* of the MS. described under No. 9706.

Complete.

Same work as that described under No. 10629, but without the first two introductory stanzas and the last stanza and with colophon as given below :—

इति वैदिकसार्वभौमचण्डमारुतदोड्डाचार्येण विरचिता वेदान्ताचार्यस्य वैभवप्रकाशिका समाप्ता ॥

No. 11437. वेदान्तदेशिकस्तोत्रम्.

VĒDĀNTADĒŚIKASTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 30*a* of the MS. described under No. 9359.

A eulogy on Vēdāntadēśika: apparently by a disciple of Nṛsiṁhaguru of Vatsagōtra, who was a disciple of Vēṅkāṭārya and Raṅganāthayati.

Beginning:

स्वस्तये हस्तविन्यस्तपुस्तकं हयमस्तकम् ।
अस्तु मे निस्तुलं वस्तु श्रीस्तनस्तबकादरम् ॥

वात्स्यं नृसिंहगुरुवर्यमुदारचर्यं श्रीवेङ्कटार्यचरणाश्रयणप्रवीणम् ।
श्रीरङ्गनाथयतिवर्यदयोदयोद्यदध्यात्मविद्यमनवद्यमहं प्रपद्ये ॥

अनवीनगवीशिरोविहारिण्य(न)पायेऽपि हरे(रौ) रमासहाये ।
सनवीनशिरोमणौ गुरौ मे सदृशो वेङ्कटदेशिकेऽस्तु भावः ॥

वेदान्तदेशिकमणिर्हृदये मदीये मोदांस्तरङ्गयतु मोहमहान्धकारम् ।
निर्मूलयन्निजघृणाघृणिभिः कटाक्षपातैरनन्तगुरुकुञ्जरपुण्यपुञ्जः ॥

End:

घण्टाघुण्टभिदं गुरुः स मुरभिद्घण्टेति घण्टापथे
श्रीशैलादिषु शुद्धबुद्धहृदयः(यः)कः(के)श्रद्दधीते(रन्)न तत् ।
यद्वादप्रभवान्निनादविभवान्नीचाः पिशाचा यतः
प्रच्छन्नाः प्रकटा दिशासु दशसु द्रागेव विद्राविताः ॥

(o) ŚAKTI.

No. 11438. देवीस्तोत्रम्.
DĒVĪSTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 11335.

Complete.

A eulogy on the goddess Dēvī and her different manifestations.

Beginning:

उष्ट्रारूढातिक्रुद्धां विरलसुवदनां मुक्तकेशीं विवस्त्रां
पाशेनाबद्धसाध्यां प्रकरविकरुणोच्चाङ्कुशेनैव देवीम् ।
मानीं त्वां चर्वयन्तीं मलिनमदमयीं भूतसङ्घैः सुसेव्यां
वन्देऽहं धूमिकाख्यां विमदमदरूपोच्चाटनामुग्रहस्ताम् ॥

* * * *

रम्भोरुपादपद्मां तां पीतवस्त्रसमाकुलाम् ।
ध्यायेऽहं बगलां देवीं सर्वारिष्टविनाशनीम् ॥

End:

भुवनविजयदक्षा पुष्पबाणेक्षुचापा
जयतु विविधरूपान् दर्शयन्ती जनानाम् ।
अरुणतरणिशोभा श्वेतवासो वसाना
जयति निखिललोकान् जीवनी मोहिनीयम् ॥

* * * *

पाशाङ्कुशौ च वरदाभयहस्तधारीं पीताम्बरी कनकभूषणभूषिताङ्गी ।
आषोडशाक्षरि . . वृतपद्मवासी एकाक्षरी त्रिभुवनाधिपतिं नमामि ॥

No. 11439. बन्दीस्तोत्रम्.

BANDĪSTŌTRAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 140*a* of the MS. described under No. 2421 and not on fol. 143*a* as stated therein.

Complete.

Same work as that described under No. 10791, but with an introduction and a different end which are given below.

Beginning:

अस्य श्रीबन्दीस्तोत्रमन्त्रस्य विभीषण ऋषिः, जगती छन्दः, श्रीरामो देवता । मम समस्तबन्धनिवृत्त्यर्थे जपे विनियोगः ।

* * * *

नरवाहन उवाच—

ब्रूहि तार्क्ष्य कथं मुक्तः सुघोरान्नागबन्धनात् ।
दृढात्मा रुचितो बन्धादृजुबुद्धिः स राघवः ॥

* * * *

नारद उवाच—

देवेन्द्र किं विषण्णोऽसि गृहाण स्तोत्रमुत्तमम् ।
प्रबन्धमोचनं नाम बन्दीप्रीतिकरं शुभम् ॥

End:

हस्तोद्यद्वरदाभयाङ्कुशकरां हाराभिरामस्थलीं(स्तनीं)
मायाबन्धविमोचनीं त्रिजगतामाद्यां विशालेक्षणाम् ।
वन्दे शृङ्खलया निबद्धचरणां नीराभिरामांशुकां
बन्दीं बन्धविमोचनीं त्रिजगतां नीलोत्पलश्यामलाम् ॥

Colophon:

इति श्रीमहारामायणे रामविभीषणसंवादे बन्दीस्तोत्रं संपूर्णम् ॥

No. **11440.** शक्तित्रयाष्टकम्—सर्वागमार्णवव्याख्यासहितम्.
ŚAKTITRAYĀṢṬAKAM WITH THE COMMENTARY SARVĀGAMĀRṆAVA.

Pages, 92. Lines, 6 on a page.

Begins on fol. 58*a* of the MS. described under No. 514, wherein this work has been mentioned as Stōtratrayavyākhyā in the list of other works.

Complete in four Taraṅgas.

A eulogy on the three goddesses Kālī, Lakṣmī and Sarasvatī: by the poet Śēṣācala. The text is accompanied by a commentary, the author of which is Vellaṅki Sītārāma, younger son of Accaṇādhvarin *alias* Naraharidīkṣita and Vīramāmbā of Kauṇḍinyagōtra.

Beginning:

श्रीमान् लोकाभिरामः सकलबुधजनस्तोमजप्तव्यनामा
श्यामः सीतासमेतः प्रथितगुणगणः सच्चिदानन्दकन्दः ।
बिभ्रद्विज्ञानमुद्रां सकरुणहृदयो वेदवेद्योऽनवद्यो
दद्यादद्याधिकां श्रीरघुकुलतिलको वाग्विभूतिं विभुर्नः ॥
काकुत्स्थान्वयपाथोधिसुधाकरमहर्निशम् ।
वन्दारुजनमन्दारं वन्दे रामं सहानुजम् ॥
श्रीमानच्चणयज्वशेखरसुतो वल्लंकिवशाग्रणीः
वीराम्बावरगर्भसागरमणिः सर्वागमाम्नायवित् ।

सीतारामसुधीरुदारकवितालक्ष्मीधरोऽम्बाष्टक-
व्याख्यानं महितागमार्णवसमाख्यानं करोति स्फुटम् ॥
सीतारामेण विदुषा श्रीवेल्लंक्यन्वयेन्दुना ।
व्याख्या स्तोत्रत्रयस्येयं तनु(न्यते) ह्यागमार्णवः ॥
ग्रन्थस्य स्वामिको रामः कर्ता नाहं तदीक्षणात् ।
बिम्बानुबिम्बरूपेण मया किंचिदुदीर्यते ॥
कालीलक्ष्मीसरस्वत्यस्तत्तत्स्तोत्रार्थवर्णने ।
कुर्वन्तु मम साहाय्यं वाग्लक्ष्मीविजयप्रदाः ॥
ग्रन्थमेतं समालोक्य शिष्येणेति कृतं मया ।
तदादरं प्रकुर्वन्तः शुद्धिं कुर्वन्तु पण्डिताः ॥

इह खलु कवितासार्वभौमः शेषाचलाख्यः कविः महाकालीमहालक्ष्मीमहासरस्वतीदेवतास्तोत्रत्रयं चिकीर्षुरादौ कालीस्तोत्रमारभमाणस्तदादौ 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथीय(थ)न्ते' इति वचनात् तत्कालीस्तोत्रे शार्दूलविक्रीडितवृत्तानुसृत्या वृत्तस्यादौ मगणप्रयोगात् 'मगणस्य धरा देवी लक्ष्मीं यच्छति नित्यशः' इति वचनात् मङ्गलं सूचितं कृतवानित्याशयः। आदौ अकारप्रयोगादपि 'अकारो ब्रह्मविष्णवीश—' इत्यादिकोशात् अकारस्य सर्वदेवतावाचकत्वेन सर्वदेवतास्तुतिरूपमङ्गलं कृतमिति वा आशयः। ननु आद्यस्तोत्रं काल्या इत्युक्तम्; तत्कथमिति चेत्, तद्देवतालिङ्गानि बहुशः स्तोत्रे सन्तीति कृत्वा काल्या इत्युक्तम्। तथाहि आद्यपद्ये करोज्ज्वलगदाखड्गोग्रशूलामिति ।

* * * *

'कालिकेति समाख्याता हिमाचलकृताश्रया' इति वचनैः काल्या एव सृष्टिकर्तृत्वमिति सवमनवद्यम् ॥

Colophon:

इति श्रीषष्टिघटिकाश्रावितसप्तकाण्डीबिरुदाङ्कितकौण्डिन्यकुलतिलकेन वीरमाम्बागर्भाम्बुधिसुधाकरेण श्रीमदच्चणाध्वरिसूनुना सीतारामेण कृतायां स्तोत्रत्रयव्याख्यायामागमार्णवसमाख्यायां प्रथमस्तरङ्गः ॥

तत्रभवान् कविरादौ कालिकाष्टकरचनां कुर्वन् काली वश्यप्रधानिके-त्युक्तरीत्या कालिकाया वश्यप्रधानत्वात वश्यकालिकाध्यानमाह—अम्बां चेति—

अम्बां चन्द्रकलाभचारुतिलकामानन्दसंदायिनीं
मन्दाराामलहेमसूनविलसन्मालापरिभ्राजिताम् ।
मन्दस्मेरमुखीं करोज्ज्वलगदाखड्गाग्रशूलां शिवां
वन्देऽहं शरदिन्दुशुभ्रवदनां वाचा मधुस्यन्दिनीम् ॥

चन्द्रस्य हिमांशोः 'हिमांशुश्चन्द्रमाश्चन्द्रः' इत्यमरः। तस्य कला एकभागः 'कला तु षोडशो भागः' इत्यमरः। तस्या आभेवाभा शोभा आकृतिर्वा 'आभा कान्त्यामाकृतौ स्यात्' इति कामन्दकः। तदस्या-स्तीति तथोक्तं चारु च तत् तिलकं तमालपत्रम् 'तमालपत्रं तिलकम्' इत्यमरः। चन्द्रकलाभं चारुतिलकं यस्यास्ताम्; प्रतिपच्चन्द्रकलातुल्य-कुङ्कुमतिलकामित्यर्थः।

End:

एतत्स्तोत्रपाठकस्य फलमाह—अम्बाष्टकमिति। भुवि भूतले.

* * * *

सर्वकल्याणः सः बान्धवसुतातिशयाभिवृद्धिं बान्धवानां सगोत्राणां सुतानां पुत्राणां स्वस्य चातिशयमत्यन्तमभिवृद्धिं साम्राज्यं [त्वं] प्राप्नोति भवति विन्दतीत्यर्थः। वसन्ततिलकावृत्तम्; 'उक्ता वसन्ततिलका तभजा(ज)-गौ गः' ॥

Colophon:

इति श्रीमत्षष्टिघटिकाश्रावितसप्तकाण्डीलक्षणलक्षितेन श्रीमद्वेलं-किकुलतिलकेन नरहरिदीक्षितसूनुना वीरमाम्बागर्भसागरसुधाकरेण सर्वागम-रहस्यवेदिना सीतारामाख्यविदुषा विरचितायां शक्तित्रयाष्टकव्याख्यायां सर्वागमार्णवाख्यायां चतुर्थस्तरङ्गः ॥

* * * *

श्रीमानच्चणयज्वशेखरसुतो वेल्लंकिवंशाग्रणीः
वीराम्बावरगर्भसागरमणिः सर्वागमाम्नायवित् ।
सीतारामसुधीरुदारकवितालक्ष्मीधरोऽम्बाष्टक-
व्याख्यानं महितागमार्णवसमाख्यानं श्रुतं (व्यातनोत्) ॥

No. 11441. श्यामलादण्डकः.
ŚYĀMALĀDAṆḌAKAḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 34*a* of the MS. described under No. 9359.

Complete.

Same work as that described under No. 10837, but with a different colophon as given below:—

इति कालिदासकविना विरचिता श्यामलाचूर्णिका समाप्ता ॥

(*p*) ŚIVA.

No. 11442. महिम्नस्स्तोत्रम्.
MAHIMNASSTŌTRAM.

Pages, 8. Lines, 8 on a page.

Begins on fol. 13*a* of the MS. described under No. 11308.

Complete.

Same text as the one described under R.No. 399(*a*) of the Triennial Catalogue of MSS., Vol. I, Part I-B.

No. 11443. महिम्नस्स्तोत्रम्.
MAHIMNASSTŌTRAM.

Pages, 12. Lines, 9 on a page.

Begins on fol. 14*a* of the MS. described under No. 10298.

Complete.

Same work as the above.

No. 11444. महिम्नस्स्तोत्रम्—सव्याख्यानम्.
MAHIMNASSTŌTRAM WITH COMMENTARY.

Pages, 18. Lines, 7 on a page.

Begins on fol. 40*a* of the MS. described under No. 10474.

Breaks off in the thirty-second stanza.

Same work as that described under R.No. 399(*a*) of the Triennial Catalogue of MSS., Vol. I, Part I–B.

No. 11445. लिङ्गाष्टकम्.
LIṄGĀṢṬAKAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 16*a* of the MS. described under No. 9239, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as that described under No. 11153

No. 11446. वीरभद्राष्टकम्.
VĪRABHADRĀṢṬAKAM.

Page, 1. Lines, 12 on a page.

Begins on fol. 28*b* of the MS. described under No. 120.

Almost complete.

Same work as that described under No. 11181.

No. 11447. शिवभुजङ्गस्तोत्रम्.
ŚIVABHUJAṄGASTŌTRAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 54*a* of the MS. described under No. 5987, wherein this work has been mentioned as Śivastōtra in the list of other works.

Complete.

Same work as that described under No. 11197.

No. 11448. शिवमङ्गलाष्टकम्.
ŚIVAMAṄGALĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 14*a* of the MS. described under No. 10183 and not on fol. 12*a* as stated therein.

Complete.

Eight stanzas addressed to Śiva and praying for His blessings.

Beginning and **End:**

पार्वतीपरमानन्दपारावारसुधाकरः ।
पायादपाद(य)राशिभ्यो भवतश्चन्द्रशेखरः ॥
पाणिग्रहे पर्वतराजपुत्र्याः पादाम्बुजं पाणिसरोरुहेण ।
अश्मानमारोपयतः स्मरारेर्मन्दस्मितं मङ्गलमातनोतु ॥
हयकपिहरिगरुत्मत्क्रोडवक्त्रं महान्तं
दशभुजनखकरालं खड्गखट्वाङ्गपाशम् ।
गिरिकुलिशत्रिशूलं मौसलं साङ्कुशं च
रिपु(नि)हननमुष्टिप्रेतसंस्थानभूतम् ॥

(*q*) ŚRĪNIVĀSAGURU.

No. 11449. श्रीनिवासगुरुमङ्गलाशासनम्.
ŚRĪNIVĀSAGURUMAṄGALĀŚĀSANAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 55*a* of the MS. described under No. 9723.

Complete.

Benedictory stanzas composed in honour of Śrīnivāsaguru.

Beginning:

अञ्जनाद्रीश्वरदयानिधये निधये सताम् ।
षड्गुणाढ्याय यतये श्रीनिवासाय मङ्गलम् ॥
श्री[नि]वासकृपया लब्धपरहंसाश्रमाय च ।
शमिताखिलतापाय श्रीनिवासाय मङ्गलम् ॥

End:

मङ्गलं श्रीनिवासस्य नित्यं भक्तिसमन्वितः ।
यः कीर्तयेदवाप्नोति श्रेयसामुत्तमां श्रियम् ॥
इह चामुत्र सर्वस्वं यस्य पादा(म्बु)जं मम ।
तं वन्दे श्रीनिवासार्यदेशिकं करुणानिधिम् ॥

No. 11450. श्रीनिवासगुरुस्तोत्रम्.
ŚRĪNIVĀSAGURUSTŌTRAM.

Pages, 21. Lines, 4 on a page.

Begins on fol. 45*a* of the MS. described under No. 9723.

Complete.

A eulogy on Śrīnivāsaguru, a disciple of Lakṣmaṇārya and a student under Rāghavārya. It is stated to have been composed by Varadācārya, a disciple of Śrīnivāsārya.

Beginning:

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
श्रीवेङ्कटेश्वरकृपापरिपूर्णपात्रं श्रीराघवार्यकृपयाधिगतात्मविद्यम् ।
श्रीलक्ष्मणार्यपदपङ्कजभृङ्गराजं श्रीश्रीनिवासगुवर्यमहं प्रपद्ये ॥
श्रीनिवासार्यगुरवे नमः सद्गुणचारवे ।
सुमनःकल्पतरवे रम्भास्तम्भसमोरवे ॥

End:

सर्वे स्युः स्थिरसम्पदो गतभया दीर्घायुषोऽनामयाः
सम्राजो विबुधा निरस्तदुरिताः सन्तानिनो ज्ञानिनः ।
स्वस्वाभीष्टमितास्स्वधर्मनिरताश्चान्तेऽन्तिकस्थामृताः ॥
भक्त्या ये मनुजाः पठन्ति सततं श्रीश्रीनिवासस्तुतिम् ॥
श्रीनिवासार्यशिष्येण श्रीकृष्णप्रियकारिणा ।
श्रीनिवासस्तुतिः प्रोक्ता वरदाचार्यसूरिणा ॥

Colophon:

श्रीनिवासस्तोत्रं संपूर्णम् ॥

INDEX.

[NOTE.—The names printed in *italics* are those of the works described.]